International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(6): 209-211
© 2023 IJSR
www.anantaajournal.com
Received: 04-10-2023
Accepted: 03-11-2023

**जुहिना खातुन**
शोधछात्रा विद्यासागर-विश्वविद्यालयस्य, पश्चिम बंगाल, भारत

**Corresponding Author:**
**जुहिना खातुन**
शोधछात्रा विद्यासागर-विश्वविद्यालयस्य, पश्चिम बंगाल, भारत

# वीणावासवदत्तमिति नाटके अभिशापस्य तात्पर्यम्

## जुहिना खातुन

**शोधसार**
संस्कृतसाहित्ये विरचितेषु नाटकेषु अज्ञातलेखकेन विरचितम् एकं दृश्यकाव्यं वीणावासवदत्त-मिति दृश्यकाव्यम् अप्रसिद्धत्वात् अपि अन्यतमम् । नाटकमिदं विविधभावेन तात्पर्यपूर्णमस्ति । वीणावासवदत्तनाटकस्य प्रारम्भे संक्षिप्त स्थापना, तस्य लिपिकरस्य विषये च किञ्चिदपि न प्रोक्तम् । अस्य नाटकस्य मातृकारूपं त्रिवान्दाम् इति नगरे तालपत्रमध्ये मालयालामिति भाषाक्षरेण उपलब्धम् । माद्राजप्रदेशे औरियेन्टालरिसार्चजार्नाल् इति पत्रिकायां १९२३ खीष्टाब्दे प्रयातः डा. सि कुनहानमहाराजः अस्य नाटकस्य अङ्कचतुष्टयमात्रं प्रकाशितवान् । अस्मिन् वीणावासवदत्तमनाटकेऽपि द्वौ शापवृत्तान्तौ स्तः। यद्यपि प्रतक्षभावेन शापवर्षनं न भवति तथापि परोक्षभावेन नाट्यकाहिन्या विकाशे अयं द्वे शापवृत्तान्तो विशेषभूमिकां पालयति । नाटकस्य प्रथमाङ्के उदयनः वाल्ये गजोऽस्मीति नरेन्द्रमार्गे हर्षमत्तैः सह दीव्यति। एकदा मार्गे यदा अङ्गारकः नाम एक मुनेः शरीरे गजस्य इव पांसुभिः अकिरत् । ततस्तेन किल महर्षिणा समुपजातामर्षेण "हस्तिहेतोरेव बन्धनं शत्रुवंशं च यास्यतीति" शापः प्रदत्तः । पुनश्च नाटकस्य पञ्चमाङ्के साङ्कृत्यायनी प्रद्योतं वदति यत् गन्धर्वराजो चित्ररथः गन्धर्वप्रभावेन नश्वररूपेण जननम् अकरोत् । एतदपि सा अवदत् वासवदत्ता सर्वगन्धर्वाणां अधिकारी भवति । नाट्यप्रयोजनविचार दिशाः शापवृत्तान्तस्य अतीव गुरुत्वम् अस्ति । शापः अभिशापरूपेण न विवेचितः,वरं कथमपि प्रकारेण आर्शीवादरूपेण आलोचितः भवति तत् विषयं नाट्यकारः अस्मिन् नाटके प्रदर्शितवान् ।

**कूटशब्दः** शप्, अभिशापः, कालिदासः, गन्धर्वः, अङ्गारकमुनिः ।

## प्रस्तावना
शप् इति धातोः शापशब्दस्य उत्पत्तिः भवति । शाप् धातोरर्थः भवति आक्रोशः। पुनः उपालम्भनार्थे अपि शप् धातोः प्रयोगो भवति । किम् उपालम्भनम् ? शपथं करोतीति। कैयटेन शाकटायेन उपालम्भनस्य अर्थः उक्तः- "उपालम्भनं प्रकाशनम्। देवदत्ताय शपते एवम्भूतोऽसाविति देवदत्तमाचष्ट इत्यर्थः । अथवा स्वाभिप्रायस्य परत्राविष्करणमु-पालम्भनं शपथः। देवदत्ताय शपते वाचा मात्रादिशरीरस्पर्शनेन देवदत्ते स्वाभिप्रायं प्रकाशयतीत्यर्थः।"[१] पुनः शव्दकल्पद्रुमे "शप्-स्वीकारः शपथः" अनृतं वदन् घोरं नरकं यास्यामि । [२] इत्येवं रूपं मिथ्यानिरसनम् सत्यावधारणम् च अर्थः परिलक्षते । नाट्य-प्रयोजनविचार दिशाः शापवृत्तान्तस्य अतीव गुरुत्वम् अस्ति । काव्ये नाटके च विधृतो शापः अभिशापरूपेण न विवेचितः,वरम् आर्शीवादरूपेण आलोचितः । नायकस्य नायिकायाश्च जीवने आरोपितो शापः विरहतापमेलनयोः च अक्षयसोपानरूपेण प्रस्फुटितः। पार्थिवप्रणयस्य स्वर्गीयप्रेम्नि उत्तरणस्य उपायमात्रम् अयं शापः। यत्र शापः अभ्युदयस्य एकमात्ररूपेण परिगणितः। विणा कारणात् कस्यचिदुपरि शापः न वर्षितः।

अतः अभिशापं निर्विचारं निन्दाम् अकृत्वा यदि कोऽपि स्वयं हृदयं पृच्छति तदा सः ज्ञास्यति शापयोग्योऽहम् इति । पापं स्वीकृत्य शास्तिग्रहणं करोतु इत्येव मनुष्यसूचको व्यापारः भवति । अत्र प्राप्त्या शापस्य महत्वं परिलक्षते । शापेन सामयिकदुःखं सदपि आत्मोपलब्ध्ये द्वारमोन्मोचनं रूपं भवति। संस्कृतसाहित्यस्य इतिहासे शापः तु अर्वाचीनप्रसङ्गो नास्ति वरं सुप्राचीनो भवति । रामायण-महाभारत-पुराणादी अभिशापस्य बहुधा उदाहरणानि सन्ति। तथैव काव्ये नाट्ये च अभिशापवृत्तान्तः अस्ति । अनेन शापवृत्तान्तेन नाट्यकारः कविः च तेषां काव्ये नाटके च चलितवृत्तान्तं प्रत्याखानं कृत्वा पाठकस्य निकटे चित्ताकर्षकस्तपे च उपस्थापयति । यथा- महाभारते आदिपर्वनि कच-देवयान्युपाख्याने शुक्राचार्यः सुरापानं प्रति अभिशापं प्रदाय-

"**यो ब्राह्मणोऽद्यप्रभृतीह कश्चिन्मोहात् सुरां पास्यति मन्दवुद्धिः ।**
**अपेतधर्म्मा ब्रह्महा चैव स स्यादस्मिन् लोके गर्हितः स्यात् परे च ।।**"[३]

अर्थात् यः मन्दवुद्धिः ब्राह्मणः मोहात् सुरां पास्यति सः अपेताधर्म्मा ब्रह्महा चैव लोके गर्हितः स्यात्। किन्तु अस्मिन् शापे कस्यापि अनिष्टकामना नास्ति वरम् एकं सदुद्देश्यम् अस्ति यत् सुरापानं ब्राह्मणैः न कर्त्तव्यम् । एवं महाभारतेपि प्रतिपदं बहवो अभिशापवृत्तान्ताः प्राप्यन्ते । रामायणेऽपि बहुधा शापवृत्तान्तः सन्ति। यथा रामायणे उत्समूले अभिशापवृत्तान्तः अस्ति । तमसानद्याः तीरे मैथुनरतक्रोञ्चदम्पत्योः मध्ये व्याधस्य शराघातेन एकं निहतो अभवत् । इदं दृष्ट्वा वाल्मिकेः कण्ठात् अभिशापो निर्गतः अभवत् –

"**मा निषाद् प्रतिष्टां त्वमगमः शाश्वतीः समाः।**
**यत् क्रोञ्चमिथुनादेकमवधीः काममोहितम्।।**"[४]

एवञ्च कालिदासस्य रचनायां बहवः शापवृत्तान्तस्य परिचयम् आप्नुमः। रघुवंशे नवमसर्गे उक्तं - पुत्रवधशोकेन कातरस्य अन्धकमुनेः दशरथाय शापः प्रदत्तः - "दिष्टान्तमाप्स्यति भवानपि पुत्रशोकादन्त्ये वस्यहमिवेति तमुतवन्तम् ।"[५] कुमारसम्भवे च उक्तं-प्रजापतेः ब्रह्मणः अभिशापे मदनस्य इयं शास्तिः –

"**अभिलाषमुदीरितेन्दियः स्वसुनामकरोत् प्रजापतिः।**
**अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत्।।**"[६]

मेघदूते कुवेरः यक्षम् अभिशापं प्रदाय-

"**कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः**
**शापेनास्तंगमितमहिमा वर्षभोग्येण भर्त्तुः।**
**यक्षश्चक्रे जनकतनया-स्नान-पुण्योदकेषु**
**स्निग्धच्छायातरुषुवसतिं रामगिर्य्याश्रमेषु।।**"[७]

विक्रमोवर्षीयमिति नाटकस्य तृतीयाङ्कस्य प्रारम्भे विष्कम्भके भरतः उर्वशैः शापं प्रदाय । उर्वशयाः अभिनयं विनष्टम् अकरोत् । तस्मात् कारणात् तां पृथिव्यां प्रेरयति । अभिज्ञान-शकुन्तलमिति नाटकेऽपि दुर्वासामुनिः शकुन्तलां प्रति शापं प्रदाय आह –

"**विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम् ।**
**स्मरिष्यति त्वां न स वोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव ।।**"[८]

**इमे सर्व्वेऽपि शापाः अतीव तात्पर्यम् आवहन्ति ।**
संस्कृतसाहित्ये विरचितेषु नाटकेषु अज्ञातलेखकेन विरचितम् एकं दृश्यकाव्यं वीणावासवदत्तमिति दृश्यकाव्यम् अप्रसिद्धत्वात् अपि अन्यतमम् । नाटकमिदं विविधभावेन तात्पर्यपूर्णमस्ति । वीणावासवदत्तनाटकस्य प्रारम्भे संक्षिप्त स्थापना, तस्य लिपिकरस्य विषये च किञ्चिदपि न प्रोक्तम् । अस्य नाटकस्य मातृकारूपं त्रिवान्दाम् इति नगरे तालपत्रमध्ये मालयालामिति भाषाक्षरेण उपलब्धम् । माद्राजप्रदेशे औरियेन्टालरिसार्चजार्नाल् इति पत्रिकायां १९२३ ख्रीष्टाब्दे प्रयातः डा. सि कुनहानमहाराजः अस्य नाटकस्य अङ्कचतुष्टयमात्रं प्रकाशितवान् । परवर्तिकाले अध्यापकः कुप्पुस्वामीशाश्त्रीमहोदयेन नाटकमिदं पुस्तकस्य आकारेन प्रकाशितम् (Madras Oriental Series 1932 as No.2 ) । अस्मिन् वीणावासवदत्तमनाटकेऽपि द्वौ शापवृत्तान्तौ स्तः। यद्यपि प्रतक्षभावेन शापवर्षनं न भवति तथापि परोक्षभावेन नाट्यकाहिन्या विकाशे अयं द्वे शापवृत्तान्तो विशेषभूमिकां पालयति । नाटकस्य प्रथमाङ्के राजा प्रद्योतः तस्य मन्त्रिणश्च च वासवदत्तायै उदयनं पात्ररूपेण निर्वाचितं करोति । प्रद्योतः अतीव दाम्भिकः राजा । सः एवं मन्यते यदि उदयनः स्वयं वासवदत्तां परिणयति तदा सः धिन्विष्यति इति । प्रद्योतस्य मन्त्रिणः उदयनं गजान्तर्गत सेनै वन्धनं करिष्यति इति परिकल्पनाम् अकुर्वन् । राजा प्रद्योतः शालङ्कायनः च भरतोराहकम् अपृच्छताम् कथं गजनैव वन्धनं कर्तुं युक्तम्। अस्य उत्तररूपेण भरतोराहकेन उक्तं-

"**वाल्ये गजोऽस्मीति नरेन्द्रमार्गे क्रीडन् सहायैः सह हर्षमत्तौः ।**
**अङ्गारकं नाम मुनिं प्रयान्तं मुहुर्मुहुः पांसुभिरभ्यषिञ्चत् ।।**"[९]

अर्थात् वाल्ये उदयनः गजोऽस्मीति नरेन्द्रमार्गे हर्षमत्तैः सह दीव्यति। एकदा मार्गे यदा अङ्गारकः नाम एक मुनेः शरीरे गजस्य इव पांसुभिः अकिरत् । ततस्तेन किल महर्षिणा समुपजातामर्षेण "हस्तिहेतोरेव बन्धनं शत्रुवंशं च यास्यतीति"[१०] शापः प्रदत्तः । इमां वार्तां भरतोराहकः चरेण माध्यमेन जानाति यत् सः तदा शाप्तः । यदि अयं शापवृत्तान्तः न स्यात् तदा दर्शकः पाठकः च न जानीतः उदयनस्य इव दक्षपराक्रमः राजा कथम् गजेन बद्धः अभवत् । पुनः यदि अयं शापो न प्रदत्तः स्यात् तदा उदयनो न बद्धो भवेत् । उदयनस्य गजान्तर्गतसेनैः बन्धनम् अभवत् । ततः सः स्वयं प्राणरक्षायैः इयं मत्तगजं वीणां वादयन् बशीभूतं शान्तमकरोत् । परवर्तीकाले अनेन वीणामाध्यमेन उदयनस्य वासवदत्तायाः च मेलनं भवति । यदि शापवृत्तान्तो न स्यात् तदा नायकस्य उदयनस्य नायिकायाः वासवदत्तायाः च मेलनं न सम्भवेत् । उदयनः अस्मात् शापाद् आहतः अभवत् । परन्तु सः आर्शीवादस्वरूपं वासवदत्ताम् लब्धवान् । पार्थिवजगति केवलमेव शतपत्री पुष्पग्रहणमस्ति किन्तु तस्य शल्येन क्षतमपि सहनीयम् । पुनः पञ्चमाङ्के उदयनः वासवदत्ता च परस्परं प्रति प्रणयासक्तौ । किन्तु उभयोर्मध्ये कश्चित् जनः कदापि न वदितुं शक्नोति। अन्यथा प्रद्योतः तस्य कन्यायाः पात्ररूपेण उदयनं निर्वाचनम् अकरोत् । किन्तु अतःपरं किं करिष्यति सःन जानाति । नाट्यकाहिनीं शिथिला अभवत् । प्रद्योतः साङ्कृत्यायनीं निकटे कन्यायाः हृदयस्य वार्तां ज्ञातुम् आगच्छति । साङ्कृत्यायनी ईश्वरं प्रति मग्ना आसीत् । सा ईश्वरस्य प्रभावेन सर्व्वमाञ्जसा अग्रे वदितुं शक्नोति । सा पूर्वानुमानं करोति कथमपि तेषां मेलनं भवति । तथैव सा प्रद्योतं वदति- "स खलु चित्ररथो नाम गन्धर्वराजो भगवता तुम्वुरूणा शाप्तो 'मनुष्येषुत्पन्नो भव' इति।"[११] अर्थात् गन्धर्वराजो चित्ररथः अस्य अनेन प्रभावेन नश्वररूपेण जननम् अकरोत् । साङ्कृत्यायनी अवदत् वासवदत्ता सर्वगन्धर्वाणां अधिकारी भवति । अन्यथा उदयनः वासवदत्तया विना विक्लवो दृष्टः मनःसन्तापात् । इमां वार्तां श्रुत्वा प्रद्योतः वासवदत्तां उदयनस्य निकटे प्रेरयति । वासवदत्ता मनःसन्तापात् उदयनं रक्षति । परन्तु राजा अपवादात् वासवदत्तां त्रातुम् उदयनं राजकन्यायाः वीणाशिक्षकरूपेण नियोजितोऽभवत् ।

अयं शापवृत्तान्तोऽपि यदि न स्यात् तदा प्रद्योतः अधुनैव इमं प्रस्तावं न गृह्णीयात् । परस्परं प्रति अनुरागो वर्धितो भूत्वा तस्य वहिःप्रकाशस्य किञ्चित् क्षेत्रम् असृजत् । नाटके करुणरसम् असृजत् । पुनः केवलम् अस्य शापवृत्तान्तेन माध्यमेन नायकस्य नायिकायाः मेलनस्य अवकाशम् आप्नोति । अतः उच्यते - न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते । अर्थात् दुःखभोगः एव दुःखभोगस्य अवसानम् । इमे शापाः न केवलं शापरूपाः, वरं शापमोचनार्थमपि शाश्वतमङ्गलोपसनायाः उपकरणं भवति ।

## उल्लेखपञ्जि

१. माधवीया धातुवृत्तिः, द्वारिकादास शास्त्री, पत्राङ्कः-३८२
२. शव्दकल्पद्रुम, मोतीलाल वनारसी दास, पत्राङ्कः-३२५
३. महाभारतम् (आदि पर्व्व), श्रीमद् हरिदास सिद्धान्तवागीश भट्टाचार्य, पत्राङ्कः-४१८
४. रामायणम् (वालकाण्डम्), श्रीवासुदेवलक्ष्मणशास्त्रीपणशीकरः, पत्राङ्कः-११
५. रघुवंशम्(नवम् सर्ग), पण्डित रामचन्द्र झा, पत्राङ्कः-८६
६. कुमारसम्भवम्(चतुर्थ सर्ग), श्री जीवानन्द विद्यासागरभट्टाचार्य्य, पत्राङ्कः-१३६
७. मेघदूतम्(पूर्वमेघ), सत्यनारायण चक्रवर्ती, पत्ताङ्कः-८९
८. अभिज्ञानशकुन्तलम्(चतुर्थोऽङ्कः), एम.आर. काले, पत्राङ्कः-१२२
९. वीणावासवदत्तम्(प्रथमोऽङ्कः), श्री.के.भि.शर्मा ड. भि.रघवन् च, पत्राङ्कः-१२
१०. तत्रैव
११. वीणावासवदत्तम्(पञ्चमोऽङ्कः), श्री.के.भि.शर्मा ड. भि.रघवन् च, पत्राङ्कः-९२

## ग्रन्थपञ्जी

### मूलसंस्कृतग्रन्था


1. 1.vīṇāvasavadattam. ed.C. Kunhan Raja. Madras.Madras Oriental Series No.2, 1927.
2. 2.vīṇāvasavadattam. ed. K.V. Sarma. Madras. Kuppuswami Shastri Research Institute; c1962.
3. कालिदासः. अभिज्ञानशकुन्तलम्. सम्पा. लेट.एम. आर. काले. नवदेहली. श्री जयेन्द्र प्रेस्. १९९४.
4. कालिदासः. कुमारसम्भवम्. सम्पा.श्रीजीवानन्द-विद्यासागरभट्टाचार्य्यः. कोलकाता. द्य रामकृष्ण मिशन इनस्टिटिउट अफ कालचार लाइब्रेरि. १६०२.
5. कालिदासः. मेघदूतम्. सम्पा. सत्यनारायण चक्रवर्ती. कोलकाता. संस्कृत पुस्तक भाण्डार. २०१६.
6. कालिदासः. रघुवंशम्. सम्पा. पण्डित रामचन्द्र झा. वाराणसी-१. घमंकुप.
7. श्रीवाल्मीकि. रामायणम्. सम्पा. श्रीवासुदेवलक्ष्मणशा-स्त्रीपणशीकरः. नवदेहली. श्रीलालबाहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठम्. २००१.
8. श्रीकृष्णद्वैपायनवेदव्यासः. महाभारतम्. सम्पा. श्रीमद् हरिदास सिद्धान्तवागीश भट्टाचार्यः. कोलकाता. विश्ववाणी प्रकाशनी. १३३८ (वङ्गाब्द).
9. सायणाचार्यः. माधवीया धातुवृत्तिः. सम्पा. द्वारिकादास शास्त्री. वाराणसी. तारा वुक एजेन्सी. १९८३.